संस्कृतवार्ता:

दिनाङ्क :-04.10.2025 प्रात: - 06:55

## अथ वार्ताः

### प्रधानमंत्री युवा

नवदिल्लीतः युवकेन्द्रिताः विविधाः प्रक्रमाः प्रधानमन्त्रिणा नरेन्द्रमोदिनाऽद्य उद्घाटयिष्यन्ते।

युवकौशलविकासक्षेत्रे ऐतिहासिकेऽस्मिन् उपक्रमे, प्रधानमन्त्री देशस्य सहस्राधिकानां शासकीय-औद्योगिकप्रशिक्षणसंस्थानानां प्रोन्नतिं कर्तुं "पी-एम–सेतुः" इत्यस्य उद्घाटनं विधास्यति।

प्रधानमन्त्री बिहारराज्ये "जननायक कर्पूरी ठाकुर कौशल विश्वविद्यालयम्" अपि उद्घाटयिष्यति, येन हि उद्योगकेन्द्रितपाठ्यक्रमानां व्यावसायिकशिक्षायाश्च संवर्धनं भविष्यति।

### सैन्य प्रमुखः राजस्थान

सैन्य प्रमुखः जनरल् उपेन्द्रद्विवेदी पाकिस्तानं प्रति निष्ठुरां संचेतनां प्रख्यापितवान् यत् यदि पाकिस्तानः पुनरपि नूतनस्य वैरभावस्य प्रयासं करिष्यति तर्हि तस्य दुष्परिणामः भविष्यति एव।

सैन्य प्रमुखेन उक्तं यत् "सिन्दूर" इति नाम्ना विख्यातस्य सिन्दूराभियानस्य मुख्यं फलम् आसीत् पाकिस्तानदेशे स्थितानां भयोत्पादकानां तेषां स्थलानां च विनष्टीकरणम्।

### विदेशमंत्रालयः

भारतम् अवदत् यत् पाकिस्तान-अधिकृत-जम्मू-कश्मीर्-प्रदेशे भयावहतया मानवाधिकारोल्लङ्घनाय पाकिस्तानस्य उत्तरदायित्वं निश्चीयते। नवदेहल्ल्यां वार्ताहर-सम्मेलने एकस्य प्रश्नस्य प्रत्युत्तरे, विदेशमन्त्रालयस्य प्रवक्ता रणधीर जैस्वालः पाकिस्तान-अधिकृतस्य जम्मू-कश्मीरस्य अनेकेषु क्षेत्रेषु क्रूरतायाः प्रतिवेदनानि सन्ति आगतानीति अधोरेखितवान्

तेनोक्तम् यत् निर्दोष-नागरिकाणामुपरि पाकिस्तान-सैनिकानां क्रूरता वरीवर्धमाना वर्तते। सः अवदत् यत् भारतानुसारम् एतत् पाकिस्तानस्य दमनकारी-दृष्टिकोणस्य स्वाभाविकं परिणामम् अस्ति तथा च एतस्य प्रदेशस्य संसाधनानां व्यवस्थित-लुण्ठनमपि अस्तीति।

### आई. ए. एफ्.-सिन्दूरः

वायुसेनायाः प्रमुखः एयर्-चीफ्-मार्शल् अमरप्रीतसिङ्हः अवदत् यत् आपरेशन सिन्दूर इति एकेन विशिष्टसंघर्षरूपेण स्मर्यते, यत्र यथार्थतया अस्माभिः स्वलक्ष्यं साधितम्, अनेनाभियानेन पाकिस्तानदेशः अधोमुखीति कृतश्च। नवदेहल्ल्यां त्रिनवतितमं वायुसेनादिवसस्य वार्षिकोत्सवं सम्बोधयन् सः अवदत् यत् भारतदेशः पाकिस्तानस्य अनेकान् लक्ष्यान् आक्रान्तवान्, अपि च अभियानावसरे पाकिस्तानस्य पञ्च युद्धविमानान्यपि नष्टीकृतानीति।

### मुख्यनिर्वाचनायुक्तः केन्द्रीयपर्यवेक्षक

मुख्यनिर्वाचनायुक्तः श्री ज्ञानेशकुमारः केन्द्रीयपर्यवेक्षकान् प्रति निर्देशान् अयच्छत् यत् ते राजनीतिकदलेभ्यः, प्रत्याशिभ्यः, मतदातृभ्यश्च परिदेवनानां निवारणार्थं पूर्णतया उपलब्धाः स्युः।

बिहारराज्यस्य आगामि-लोकसभा-निर्वाचने अपि च कतिपयेषु राज्येषु उपनिर्वाचनेषु नियोजयितान् केन्द्रीयपर्यवेक्षकान् उद्दिश्य प्रदत्ते उपोद्घाते श्रीकुमारः अवोचत् यत् निर्वाचनपर्यवेक्षकाः लोकशासनस्य दीपकाः इव भवन्ति।

सः पर्यवेक्षकान् निर्दिष्टवान् यत् ते मतदानकेन्द्राणि परिशीलयन्तु, मतदातॄणां सुविधायै आयोगेन स्वीकृतानां प्रत्यग्रानां उपायानां कार्यान्वयनं सुनिश्चितं च कुर्वन्तु इति। ते क्षेत्रात् प्रत्यक्षरूपेण सूचनाः प्रदद्युः सहैव निष्पक्षतया कठोररूपेण च नियमानां पालनं सुनिश्चयं कुर्वन्तु इत्यपि तेन उक्तम्।

**शिवराजसिंहचौहानः**

कृषि तथा कृषककल्याणमन्त्रिणा श्रीशिवराजसिंहचौहानेन कृषिशिक्षाक्षेत्रे महत्त्वपूर्णः निर्णयः समुद्घोषितः। सः अवदत् यत् कृषिविश्वविद्यालयेषु स्नातकपदवीयस्थानानां विंशतिः प्रतिशतं भागः अखिलभारतीयप्रतियोगीपरीक्षाद्वारा पूरयिष्यते।

तेन समुदीरितं यत् प्रवेशपरीक्षाणां संचालनं “एकं राष्ट्रं, एका कृषि, एकं दलं" इत्यस्य भावेन भविष्यति।

।।इति वार्ताः।।